## (1066) "प्रच्छ ज्ञीप्सायाम्" (VI-तुदादिः-1413. सक. अनि. पर.) किरादिः ।

[1]प्रच्छकः-च्छिका, प्रच्छकः-च्छिका, [2]पिपृच्छिषकः-षिका, [3]परीपृच्छकः-च्छिका ;

[4]प्रष्टा-प्रष्ट्री, प्रच्छयिता-त्री, पिपृच्छिषिता-त्री, परीपृच्छिता-त्री ;

[5]पृच्छन्-न्ती-ती, प्रच्छयन्-न्ती, पिपृच्छिषन्-न्ती ; —

[6]प्रक्ष्यन्-न्ती-ती, प्रच्छयिष्यन्, पिपृच्छिषिष्यन्-न्ती-ती ; —

[7]सम्पृच्छमानः, [8]आपृच्छमानः,[A] प्रच्छयमानः, [9]आपिपृच्छिषमाणः, संपिपृच्छिषमाणः, परीपृच्छ्यमानः ;

सम्प्रक्ष्यमाणः-आप्रक्ष्यमाणः, प्रच्छयिष्यमाणः, आपिपृच्छिषिष्यमाणः-सम्पिपृच्छिषिष्यमाणः, परीपृच्छिष्यमाणः ;

---

1. 'प्रछ' इत्येव धातुः। तत्र, 'छे च' (6-1-73) इति ह्रस्वस्य तुकि, तस्य श्चुत्वेन चकारः सर्वत्र ज्ञेयः।
2. सन्नन्तात् ण्वुलि, 'किरश्च पञ्चभ्यः' (7-2-75) इतीडागमे, 'रुदविदमुषग्रहिस्वपिप्रच्छः संश्च' (1-2-8) इति सनः कित्वे, 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च' (6-1-16) इति सम्प्रसारणे षत्वे च रूपम्। एवं सन्नन्ते सर्वत्र ज्ञेयम्।
3. यङन्ते सर्वत्र यङ्निमित्तकं सम्प्रसारणं भवति। पश्चात् 'रीगृत्वत इति वक्तव्यम्' (वा. 7-4-90) इति रीक् अभ्यासस्य।
4. तृचि, 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' (8-2-36) इति षत्वे, 'ष्टुना ष्टुः' (8-4-41) इति ष्टुत्वे च रूपम्। एवं तव्यदादिष्वपि ज्ञेयम्।
5. शतरि, 'तुदादिभ्यः—' (3-1-77) इति विकरणप्रत्ययः शः। तस्य सार्वधातुकत्वेन ङिद्वद्भावात् सम्प्रसारणे रूपमेवम्। एवं शानजन्तेऽपि प्रक्रिया ज्ञेया।
6. स्यप्रत्यये, 'व्रश्च—' (8-2-36) इत्यादिना षत्वे, 'षढोः कः सि' (8-2-41) इति षकारस्य ककारे, षत्वे च रूपमेवम्।
7. 'विदिप्रच्छिस्वरतीनामुपसंख्यानम्' (वा. 1-3-29) इति वार्तिकेन सम्पूर्वकादस्मादात्मनेपदं, शानच् भवति।
8. 'आङि नुप्रच्छ्योरुपसंख्यानम्' (वा. 1-3-21) इति आङ्पूर्वकादस्माच्छानच्।
9. 'पूर्ववत् सनः' (1-3-62) इति संपूर्वकात्, आङ्पूर्वकाच्च सन्नन्तेऽपि शानच्।

A. 'कृतगुरुतरहारच्छेदमालिङ्ग्य पत्यौ परिशिथिलितगात्रे गन्तुमापृच्छमाने।' शि. व. 11-38.

Indologisches Seminar
der Universität Bonn